# Chapter 1. मम मित्रं भवन्तु

## अनुप्रयोगः

**1. अधोलिखितानां पदानां शुद्धोच्चारणं कृत्वा तेषाम् अनुलेखनम् क्रियताम् (निम्नलिखित पदों का शुद्ध उच्चारण करके उनको फिर से लिखें)**
(क) समीक्षन्ताम् ..........................
(ख) मित्रादभयममित्राद् ..........................
(ग) नश्चतस्त्वः ..........................
(घ) सन्त्वापः ..........................
(ङ) यत्किञ्च ..........................

**उत्तर:**
छात्र इन पदों को उनके सामने फिर से लिखें।

**2. पाठम् अनुसृत्य अधोलिखितेषु पदेषु सन्धि-सन्धिच्छेदं वा कुरुत (पाठ के अनुसार निम्न पदों में सन्धि अथवा सन्धिच्छेद कीजिए)**
(क) शम् + नः = ...........................
(ख) प्रदिशो भवन्तु = .......................... + ...........................
(ग) सर्वाः + आशाः = ...........................
(घ) उरुचक्षा उदेतु = ..................... + ..........................
(ङ) यत् + किम् + च = ...........................

**उत्तर:**
(क) शं नः
(ख) प्रदिशः + भवन्तु
(ग) सर्वा आशाः
(घ) उरुचक्षाः + उदेतु
(ङ) यत्किञ्च

**3. अधोलिखितानाम् अर्थानां स्थाने पाठे प्रयुक्तानि पदानि लिखत (निम्नलिखित अर्थों के स्थान पर पाठ में प्रयुक्त पदों को लिखिए) पदानि अर्थाः**

| | पदानि | | अर्थाः |
|---|---|---|---|
| (क) | ........................ | = | पश्यामि |
| (ख) | ........................ | = | कल्याणम् |
| (ग) | ........................ | = | नयनम् |
| (घ) | ........................ | = | वैरी |
| (ङ) | ........................ | = | समक्षम् |
| (च) | ........................ | = | गिरयः |
| (छ) | ........................ | = | अस्माकम् |
| (ज) | ........................ | = | जलानि |
| (झ) | ........................ | = | परिचितः |
| (ञ) | ........................ | = | निशायाम् |

**उत्तर:**
(क) समीक्षे
(ख) शम्
(ग) चक्षुष् (चक्षुः)
(घ) अमित्रम्
(ङ) पुरः
(च) पर्वताः
(छ) नः
(ज) आपः
(झ) ज्ञातः
(ञ) नक्तम्।

**4. उचितसर्वनामपदैः रिक्तस्थानपूर्ति कुरुत (उचित सर्वनाम पदों से रिक्त स्थानों को भरिए)**
(क) सर्वे प्राणिनः ................ मित्रदृष्ट्या पश्यन्तु। (अस्मद्)
(ख) ................ वस्तूनाम् उपभोगः आसक्तिं विहाय एव कर्तव्यः। (सर्व)
(ग) .............. त्यक्तेन भुञ्जीथाः। मा गृधः कस्यस्विद् धनम्। (तत्)
(घ) दिने वा रात्रौ वा .................... भयरहिताः भवेम। (अस्मद्)।
(ङ) अहं मित्रस्य चक्षुषा ...................... भूतानि समीक्षे। (सर्व)

**उत्तर:**
(क) सर्वे प्राणिनः मां मित्रदृष्ट्या पश्यन्तु।
(ख) सर्वेषां वस्तूनाम् उपभोगः आसक्तिं विहाय एव कर्तव्यः।
(ग) तेन त्यक्तेन भुञ्जीथाः। मा गृधः कस्यस्विद् धनम्।

(घ) दिने वा रात्रौ वा वयम् भयरहिताः भवेम।
(ङ) अहं मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्षे।

**5. पाठात् चित्वा विशेषणानि योजयत (पाठ से चुनकर विशेषण जोडिए) विशेषणानि विशेष्याणि**

| | विशेषणानि | विशेष्याणि |
|---|---|---|
| (क) | .................... | पर्वताः |
| (ख) | .................... | भूतानि |
| (ग) | .................... | सर्वम् |
| (घ) | .................... | प्रदिशः |
| (ङ) | .................... | आशाः |
| (च) | .................... | सूर्यः |

**उत्तर:**
(क) ध्रुवयः
(ख) सर्वाणि
(ग) इदं
(घ) चतस्त्र
(ङ) सर्वाः
(च) उरुचक्षाः।

**6. अधोलिखितवाक्येषु कोष्ठकात् उचितं क्रियापदं विचित्य योजयत (निम्नलिखित वाक्यों में कोष्ठक से उचित क्रियापद चुनकर जोड़िए)**

(क) अहं मित्रस्य चक्षुषा सर्वाणि भूतानि .............। (समीक्षे । समीक्षामहे)
(ख) वयं अहर्निशं भयरहिताः .............। (भवेयम् । भवेम)
(ग) त्वं त्यागपूर्वकं वस्तूनि ..........। (भुञ्जीथाः । भुञ्जीत)
(घ) आपः अस्माकं कल्याणाय ..............। (अस्तु । सन्तु)
(ङ) सर्वाः दिशः मम मित्रं ............। (भवन्तु / भवतु)

**उत्तर:**
(क) समीक्षे
(ख) भवेम
(ग) भुञ्जीथाः
(घ) सन्तु
(ङ) भवन्तु।

**7. अधोलिखितान् प्रश्नान् संस्कृतभाषया उत्तरत (निम्नलिखित प्रश्नों के संस्कृत भाषा में उत्तर दीजिए)**

(क) सर्वाणि भूतानि कथं द्रष्टव्यानि?
(ख) इदं सर्वं जगत् केन व्याप्तम्?
(ग) कति प्रदिशः अस्माकं कल्याणं कुर्वन्तु?
(घ) ध्रुवयः पर्वताः अस्माकं कृते कीदृशाः भवेयुः?
(ङ) मम मित्रं काः भवन्तु?
(च) केभ्यः अस्माकम् अभयं भवेत्?

**उत्तर:**

(क) सर्वाणि भूतानि मित्रस्य चक्षुषा द्रष्टव्यानि।
(ख) इदं सर्वं जगत् ईश्वरेण व्याप्तम्।
(ग) चतस्त्रः प्रदिशः अस्माकं कल्याणं कुर्वन्तु।
(घ) ध्रुवयः पर्वताः अस्माकं कृते कल्याणकारकाः भवेयुः।
(ङ) मम मित्रं सर्वाः आशाः (दिशाः) भवन्तु।
(च) मित्रात् अमित्रात् ज्ञातात् परोक्षात् च अस्माकम् अभयं भवेत्।

**8. अधोलिखितेषु अन्वयेषु उचित-रिक्तस्थानपूर्तिं कुरुत। (निम्नलिखित अन्वयों में उचित रिक्त स्थान की पूर्ति कीजिए।)**

(क) जगत्यां यत् किञ्च ............................ इदं सर्वम् ईशा वास्यम्, तेन ........................... भुञ्जीथाः। कस्यस्विद् धनम् मा .........................।

(ख) उरुचक्षा ................... नः शम् उदेतु। चतस्रः ................... नः शं भवन्तु। ध्रुवयः पर्वताः ................ शं भवन्तु। सिन्धवः नः शम्। उ ....................... शं सन्तु।

**उत्तर:**

(क) जगत्यां यत् किञ्च जगत् इदं सर्वम् ईशा वास्यम्, तेन त्यक्तेन भुञ्जीथाः। कस्यस्विद् धनम् मा गृधः।

(ख) उरुचक्षा सूर्यः नः शम् उदेतु। चतस्त्रः प्रदिशः नः शं भवन्तु। ध्रुवयः पर्वताः नः शं भवन्तु। सिन्धवः नः शम्। उ आपः शं सन्तु।

**9. अधोलिखितपक्तीनां भावम् अनुसृत्य पाठात् चित्वा पक्तिं लिखत। (निम्नलिखित पंक्तियों के भाव के अनुसार पाठ से चुन कर पंक्ति लिखिए।)**

(क) सकलाः दिशः मम मित्रभूताः सन्तु। ....................
(ख) सरितः सागराः च अस्माकं कल्याणं कुर्वन्तु। ....................
(ग) सर्वे प्राणिनः मां मित्रवत् पश्यन्तु। ....................
(घ) सर्वः संसारः ईश्वरेण व्याप्तः। ....................

**उत्तर:**
(क) सर्वा आशा मम मित्रं भवन्तु।
(ख) शं नः सिन्धवः।
(ग) मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्।
(घ) ईशा वास्यमिदं सर्वम्।

**10. अधः केषाञ्चित् श्लोकानां भावार्थः दत्तः। उचितपदैः रिक्तस्थानपूर्तिं कुरुत। (नीचे कुछ श्लोकों का भावार्थ दिया गया है उचित पदों से रिक्त स्थान भरिए।)**

**(क) सर्वे प्राणिनः मां............................ पश्यन्तु। अहम् अपि तान् मित्रवत् .......................। यतः मित्रता सुखदायिनी भवति। यस्मिन् परिवारे समाजे वा .................... स्नेहः भवति तत्र आनन्दमयं वातावरणं जायते। अतः जनेषु मैत्रीसम्बन्धः ......................... प्राप्नोतु।**

**उत्तर:**
सर्वे प्राणिनः मां मित्रवत् पश्यन्तु। अहम् अपि तान् मित्रवत् पश्यामि। यतः मित्रता सुखदायिनी भवति। यस्मिन् परिवारे समाजे वा परस्परं स्नेहः भवति तत्र आनन्दमयं वातावरणं जायते। अतः जनेषु मैत्रीसम्बन्धः विकासं प्राप्नोतु।।

**(ख) एषः जडचेतनरूपः संसारः ................................ व्याप्तः। संसारे लभ्याः ................................ आहारादिकं च प्राणिनाम् उपभोगाय सन्ति। वस्तूनाम् उपभोगः आसक्तिं ............................ एव कर्तव्यः। अन्येषां जनानां धनादिकं प्रति .......................... न कर्तव्यः ।**

**उत्तर:**
एषः जडचेतनरूपः संसारः ईश्वरेण व्याप्तः। संसारे लभ्याः पदार्थाः आहारादिकं च प्राणिनाम् उपभोगाय सन्ति। वस्तूनाम उपभोगः आसक्तिं विना एव कर्तव्यः। अन्येषां जनानां धनादिकं प्रति लोभः न कर्तव्यः।

**(ग) अस्माकं जीवनं ................................ भवेत्। मित्रात्, शत्रोः परिचितात् नरात् वस्तुनः वा ............................. भयं न स्यात्। दिने वा ............................ वा वयं भयरहिताः भवेम। मित्रभूताः सर्वाः दिशः अस्मान् ......................।**

**उत्तरः**

अस्माकं जीवनं भयरहितं भवेत्। मित्रात्, शत्रोः परिचितात् नरात् वस्तुनः वा किमपि भयं न स्यात्। दिने वा रात्रौ वा वयं भयरहिताः भवेम। मित्रभूताः सर्वाः दिशः अस्मान् सुखयन्तु।